


# श्री मातङ्गी अष्टोत्तरशतनाम स्तोत्रम्

**पंडित सुनील वत्स**

https://astrodisha.com

**Whatsapp No: 7838813444**

**Facebook: https://www.facebook.com/AstroDishaPtSunilVats**

**YouTube Channel : https://www.youtube.com/c/astrodisha**

# Sri Matangi Ashtottara Shatanama Stotram

# श्री मातङ्गी अष्टोत्तरशतनाम स्तोत्रम्

॥ ध्यान ॥

ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलाङ्गीं
न्यस्तैकाङ्घ्रिं सरोजे शशिशकलधरां वल्लकीं वादयन्तीम् ।
कह्लाराबद्धमालां नियमितविलसच्चोलिकां रक्तवस्त्रां
मातङ्गीं शङ्खपात्रां मधुरमधुमदां चित्रकोद्भासिभालाम् ॥

॥ विनियोग ॥

ॐ अस्य श्रीमातङ्गीशतनाम्नां भगवान्मतङ्ग ऋषिरनुष्टुप्छन्दो मातङ्गी देवता मातङ्गी प्रीतये जपे विनियोगः ॥

॥ श्री भैरव्युवाच ॥

भगवञ्छ्रोतुमिच्छामि मातङ्ग्याः शतनामकम् ।
यद्गुह्यं सर्वतन्त्रेषु केनापि न प्रकाशितम् ॥१॥

॥ श्री भैरव उवाच ॥

शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकम् ।
नाख्येयं यत्र कुत्रापि पठनीयं परात्परम् ॥२॥

यस्यैकवारपठनात्सर्वे विघ्ना उपद्रवाः ।
नश्यन्ति तत्क्षणाद्देवि वह्निना तूलराशिवत् ॥३॥

प्रसन्ना जायते देवी मातङ्गी चास्य पाठतः ।
सहस्रनामपठने यत्फलं परिकीर्तितम् ।
तत्कोटिगुणितं देवी नामाष्टशतकं शुभम् ॥४॥

॥ स्तोत्र ॥

महामत्तमातङ्गिनी सिद्धिरूपा तथा योगिनी भद्रकाली रमा च ।
भवानी भयप्रीतिदा भूतियुक्ता भवाराधिता भूतिसम्पत्करी च ॥१॥

जनाधीशमाता धनागारदृष्टि-र्धनेशार्चिता धीरवासी वराङ्गी ।
प्रकृष्टा प्रभारूपिणी कामरूपा प्रहृष्टा महाकीर्तिदा कर्णनाली ॥२॥

काली भगा घोररूपा भगाङ्गी भगाह्वा भगप्रीतिदा भीमरूपा ।
भवानी महाकौशिकी कोशपूर्णा किशोरी किशोरप्रिया नन्दईहा ॥३॥

महाकारणाकारणा कर्मशीला कपाली प्रसिद्धा महासिद्धखण्डा ।
मकारप्रिया मानरूपा महेशी महोल्लासिनी लास्यलीलालयाङ्गी ॥४॥

क्षमा क्षेमशीला क्षपाकारिणी चा-क्षयप्रीतिदा भूतियुक्ता भवानी ।
भवाराधिता भूतिसत्यात्मिका च प्रभोद्भासिता भानुभास्वत्करा च ॥ ५ ॥

धराधीशमाता धनागारदृष्टि-र्धनेशार्चिता धीवरा धीवराङ्गी ।
प्रकृष्टा प्रभारूपिणी प्राणरूपा प्रकृष्टस्वरूपा स्वरूपप्रिया च ॥६॥

चलत्कुण्डला कामिनी कान्तयुक्ता कपालाचला कालकोद्धारिणी च ।

कदम्बप्रिया कोटरी कोटदेहा क्रमा कीर्तिदा कर्णरूपा च काक्ष्मी ॥७॥

क्षमाङ्गी क्षयप्रेमरूपा क्षपा च क्षयाक्षा क्षयाह्वा क्षयाप्रान्तरा च ।
क्षवत्कामिनी क्षारिणी क्षीरपूषा शिवाङ्गी च शाकम्भरी शाकदेहा ॥८॥

महाशाकयज्ञा फलप्राशका च शकाह्वाशकाह्वा शकाख्याशका च ।
शकाक्षान्तरोषा सुरोषा सुरेखा महाशेषयज्ञोपवीतप्रिया च ॥९॥

जयन्ती जया जाग्रती योग्यरूपा जयाङ्गा जपध्यानसन्तुष्टसंज्ञा ।
जयप्राणरूपा जयस्वर्णदेहा जयज्वालिनी यामिनी याम्यरूपा ॥१०॥

जगन्मातृरूपा जगद्रक्षणा च स्वधावौषडन्ता विलम्बाविलम्बा ।
षडङ्गा महालम्बरूपासिहस्ता पदाहारिणी हारिणी हारिणी च ॥११॥

महामङ्गला मङ्गलप्रेमकीर्ति-र्निशुम्भक्षिदा शुम्भदर्पत्वहा च ।
तथानन्दबीजादिमुक्तिस्वरूपा तथा चण्डमुण्डापदा मुख्यचण्डा ॥१२॥

प्रचण्डाप्रचण्डा महाचण्डवेगा चलच्चामरा चामरा चन्द्रकीर्तिः ।
सुचामीकरा चित्रभूषोज्ज्वलाङ्गी सुसङ्गीतगीता च पायादपायात् ॥१३॥

इति ते कथितं देवि नाम्नामष्टोत्तरं शतम् ।
गोप्यं च सर्वतन्त्रेषु गोपनीयं च सर्वदा ॥१४॥

एतस्य सतताभ्यासात्साक्षाद्देवो महेश्वरः ।

त्रिसन्ध्यं च महाभक्त्या पठनीयं सुखोदयम् ॥१५॥

न तस्य दुष्करं किञ्चिज्जायते स्पर्शतः क्षणात् ।
स्वकृतं यत्तदेवाप्तं तस्मादावर्तयेत्सदा ॥१६॥

सदैव सन्निधौ तस्य देवी वसति सादरम् ।
अयोगा ये त एवाग्रे सुयोगाश्च भवन्ति वै ॥१७॥

त एव मित्रभूताश्च भवन्ति तत्प्रसादतः ।
विषाणि नोपसर्पन्ति व्याधयो न स्पृशन्ति तान् ॥१८॥

लूता विस्फोटकाः सर्वे शमं यन्ति च तत्क्षणात् ।
जरापलितनिर्मुक्तः कल्पजीवी भवेन्नरः ॥१९॥

अपि किं बहुनोक्तेन सान्निध्यं फलमाप्नुयात् ।
यावन्मया पुरा प्रोक्तं फलं साहस्रनामकम् ।
तत्सर्वं लभते मर्त्यो महामायाप्रसादतः ॥२०॥

**॥ इति श्रीरुद्रयामले श्रीमातङ्गीशतनामस्तोत्रम् सम्पूर्णम् ॥**

पंडित संजीत वत्स

**पंडित सुनील वत्स**

Website : https://astrodisha.com

Whatsapp No : +91- 7838813444

Contact No: +91-7838813 - 444 / 555 / 666 / 777

Facebook : https://www.facebook.com/AstroDishaPtSunilVats

YouTube Channel : https://www.youtube.com/c/astrodisha

पंडित सुनील वत्स